# श्री शिवाशिव गणेश स्तोत्रं

## श्री शक्तिशिवा वूचतु:

नमस्ते गणनाथाय गणानां पतये नम: |
भक्तिप्रियाय देवेश भक्तेभ्य: सुखदायक || १ ||

स्वानन्दवासिने तुभ्यं सिद्धि बुद्धि वराय च |
नाभिशेषाय देवाय ढुण्ढिराजाय ते नम: || २ ||

वरदाभय हस्ताय नम: परशुधारिणे |
नमस्ते सृणिहस्ताय नाभिशेषाय ते नम: || ३ ||

अनामयाय सर्वाय सर्वपूज्याय ते नम: |
सगुणाय नमस्तुभ्यं ब्रह्मणे निर्गुणाय च || ४ ||

ब्रह्मभ्यो ब्रह्मदात्रे च गजानन नमोऽस्तु ते |
आदिपूज्याय ज्येष्ठाय ज्येष्ठराजाय ते नम: || ५ ||

मात्रे पित्रे च सर्वेषां हेरम्बाय नमो नम: ।
अनादये च विघ्नेश विघ्नहन्त्रे नमो नम: ॥ ६ ॥

विघन्हत्र्रे स्वभक्तानां लम्बोदर नमोस्तु ते ।
त्वदीय भक्तियोगेन योगीशा: शान्तिमागता: ॥ ७ ॥

किं स्तुवो योगरूपं तं प्रणमावश्च विघन्पम् ।
तेन तुष्टो भव स्वामिन्नित्युक्त्वा तं प्रणेमतु: ॥ ८ ॥

तावुत्थाप्य गणाधीश उवाच तौ महेश्वरौ ।

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

## श्रीगणेश उवाच

**भवत्कृतमिदं स्तोत्रं मम भक्ति विवर्धनम् ॥ ९ ॥**
**भविष्यति च सौख्यस्य पठते श्रृण्वते प्रदम् ।**

**भुक्ति मुक्ति प्रदं चैव पुत्र पौत्रादिकं तथा ॥ १० ॥**
**धन धान्यादिकं सर्व लभते तेन निश्चितम् ॥**

## इति श्री शिवाशिव गणेश स्तोत्रं सम्पूर्णं

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133